॥ अथशारदातिलकः प्रारंभः॥

श्रीगणेशायनमः॥अथशारदातिलके गायत्रीपुरश्चरणविधिप्रारंभः॥अथो
वदामिगायत्रीतत्वरूपांत्रयीमयीं॥ययाप्रकाश्यतेब्रह्मसच्चिदानंदलक्षणं॥
प्रणवाद्याव्याहृतयःसप्तस्युस्तत्सदादिकाः॥चतुर्विंशत्यक्षरात्मागायत्री
शिरसान्विता॥सर्ववेदोद्धृतःसारोमंत्रोयंसमुदाहृतः॥ब्रह्मादेव्यादिगा
यत्रीपरमात्मासमीरितः॥सप्ताद्याःप्रणवस्थेतेमुनिभिःपरिकीर्तिताः॥
जमदग्निभरद्वाजभृगुगौतमकश्यपान्॥विश्वामित्रवसिष्ठाख्यान्व्या
हृतीनामृषीन्विदुः॥गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तयस्मृताः॥त्रि राम्
ष्टुब्जगत्यश्छंदांसिकथितानिमनीषिभिः॥सप्ताचिरनिलःस्तूयीवा ९

क्षतिर्वरुणोदक्षा॥विश्वेदेवाःक्रमादसांदेवताःपरिकीर्तिताः॥गायत्र्यामुनिरा
ख्यातोविश्वामित्रोमहाद्युतिः॥गायत्रीछंदइत्युक्तंदेवतासवितास्मृतः॥शिर
सोस्यमुनिर्ब्रह्माछंदोदेव्यादिकास्मृताः॥गायत्रीपरमात्मास्यादेवताकथि
तामुधैः॥व्याहृतीसप्ततारांद्यान्मुखांसोरुयुग्मके॥जठरेन्यस्यमंत्राज्ञागा
यत्र्यर्णांस्ततोन्यसेत्॥पत्संधिषुकटीनाभौहृत्कंठभुजसंधिषु॥मुखनास
कयोर्लक्षीकर्णभ्रूमस्तकेपुनः॥पाश्चात्योत्तरयाम्यप्राक्ऊर्ध्ववक्त्रेषुसाध
कः॥पदानिदशविन्यस्येदेषुस्थानेषुमंत्रवित्॥शिरोभ्रूमध्यदृग्वक्त्रकंठ
हृन्नाभिगुह्यके॥जानुनोःपादयोर्युग्मेतत्पदाक्षरसिन्यसेत्॥ब्रह्म
णोहृदयंप्रोक्तंविष्णवेशिरईरितं॥शिखारुद्रायकवचमीश्वरायसमीरितं॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नेत्रंसदाशिवायोक्तमस्त्रंसर्वात्मनःस्मृतं॥षडंगान्येवमुक्तानियथास्थानंप्रविन्यसेत्॥मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्सार्थवर्णात्मिकां॥गायत्रींवरदाभयांकुशकशांशूलंकपालंगुणंशंखंचक्रमथारविंदयुगलंहस्तैर्वहंतींभजेत्॥प्राणायामान्पुराकृत्वागायत्रींसंध्ययोर्जपेत्॥सप्तव्याहृतिसंयुक्तांगायत्रींशिरसान्वितां।त्रिरुच्चरंध्यान्प्राणान्धारयेद्यतमानसः॥प्राणायामोमयाख्यातोसमस्तदुरितापहः॥व्याहृतित्रयसंयुक्तांगायत्रींदीक्षितोजपेत्॥तत्तल्लक्षविधानेनभिक्षाशीविशितेंद्रियः॥क्षीरोदनंतिलान्दूर्वान्क्षीरद्रुमसमिद्वरान्॥एतत्कृत्वासहस्रत्रितयंजुहुयान्मंत्रसिद्धये।विधायमंडलंकृत्वात्रिकोणोज्वलकर्णि

रामू॰ २

कं॥सौरपीठंजपेत्तत्रदीप्तादिनवशक्तिभिः॥दीप्तासूक्ष्माजयाभद्राविभूतिर्विमलाप्रिया॥अमोघाविद्युतःसर्वतोमुखीसर्वपीठयः॥मूलमंत्रेणकूर्मायांमूर्तौदेवींप्रपूजयेत्॥कोणेषुत्रिषुसंपूज्यब्रह्माद्याःशक्तयोबहिः॥आदित्याद्यास्ततःपूज्याउषादिसहिताःक्रमात्॥आदित्याद्याश्चतस्त्रोत्याशक्तयःकोणपत्रगाः॥आदित्यश्चरविर्भानुःसूर्योभास्कर एवच॥उषाप्रज्ञाप्रभासंध्याशक्तयःपरिकीर्तिताः॥ततःषडंगानभ्यर्चेत्केसरेषुयथाविधि॥प्रह्लादिनींप्रभांपश्चान्नित्यांविश्वंभरांपुनः॥विलासिनीप्रभावत्योविप्राङ्गंतगतंतःपरं॥कांतादुर्गासरस्वतीविद्यारूपातथापरा।विशालासंज्ञितामीशंव्यापिनींविमलांयजेत्॥तमोपहारिणींसूक्ष्मांविश्वयोनिंजयावहां॥

पद्मासनोपरिशोभांपद्मरूपांततोर्चयेत्॥ ब्राह्म्याद्याः शक्तयोवाद्याः पूजयेत्स्वो
क्तलक्षणाः॥ततोभ्यर्चेत्ग्रहान्बाह्ये शक्राद्यान्यायुधैःसह॥ इत्थमावरणैर्दे
वींदशाभिःपरिपूजयेत्॥ धर्मार्थकाममोक्षाणांभोक्तास्याद्द्विजसत्तमः॥
तत्संख्यासहस्राणिमंत्रविज्जुहुयान्नित्यैः॥ सर्वपापविनिर्मुक्तोदीर्घमा
युश्चविंदति॥आयुषेसाज्यहविषाकेवलेनाथसर्पिषा॥ दूर्वान्नैकैस्तिलै
र्मंत्रैर्जुहुयात्त्रिसहस्रकं॥अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतंततः॥
महालक्ष्मीर्भजेत्तस्यषण्मासान्नात्रसंशयः॥ब्रह्मश्रियेप्रजुयात्तस्तै
र्ब्रह्मवृक्षजैः॥बहुनात्रकिमिहोक्तेनयथावत्साधुसादिता॥द्विजन्म रामू
नामियंविद्यासिद्धाकामदुघामता॥इतिशारदातिलकेगायत्रीपुर ३

श्चरणकारिकासमाप्ता॥ ॥अथसंक्षेपेणप्रयोगोलिख्यते॥ ॥पूर्वंप्राय
श्चित्तंसार्धार्द्धंकृत्वा॥गायत्रीपुरश्चरणेअधिकारसिध्यर्थंलक्षसंख्या
गायत्रीजपंकृत्वा॥ततःगायत्रीमंत्रशुध्यर्थंअयुतजपंकृत्वा॥ततःगाय
त्रीमंत्रसिध्यर्थंगायत्री-ह्ययुतंजपेत्॥ततःश्रीपरमेश्वरप्रीत्यर्थंचतु
र्विंशतिलक्षात्मकगायत्रीपुरश्चरणाख्यंकर्मकरिष्ये॥तदंगंपुण्याह
वाचनंमातृकापूजनंनांदीश्राद्धंआचार्यऋत्विग्वरणानिकरिष्ये॥म
धुपर्कादिभिःपूजयेत्॥ततःश्रीभूतशुद्धिंपवनपावनंचन्यासान्कृ
त्वा॥ततःसर्वतोभद्रमध्येदेवतांस्थापयेत्॥कलशोपरिपूर्णपात्रे

शार॰ति॰ ४ पूर्वोक्तत्रिकोणपीठे गायत्रीदेवतामावाहयेत्॥ततः सोरपीठादिदेवतादशमावर
णैः पूजयेत्॥सच्चिदोध्यानंहरा॥प्रारंभदिवसादिसमाप्तिपर्यंतंप्रसहंस
मानजपंकुर्युः॥अंतराळेव्रतचर्याहविष्यभोजनंत्रिषवणस्नानंजपशतांशो
शां नहवनंतद्दशांशतर्पणंतद्दशांशमार्जनंतद्दशांशब्राह्मणभोजनं॥ शो
इतिशारदातिलकेगायत्रीपुरश्चरणविधिः समाप्तः॥ ॥अथप्रयोगः॥
सर्षपान्विकीर्यंयदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्
सर्वंयत्रस्थंतत्रगच्छतु॥अपक्रामंतुभूतानि॰॥सुस्थयनंतार्क्ष्यमरिष्ट॰
×शुचीवेतिपंचगव्येनसर्वंगृहंप्रोक्ष्य॥आपोहिष्ठेतिशुद्धोदकंदेवाःआयांतु॥ राम॰ ४

सूर्यःसोमोयमःकालःसंध्येभूताह्यहःक्षपा॥पवनोदिक्पतिर्भूमिराका
शंखेचरामराः॥ब्रह्मशासनमास्थायकल्पध्वमिहसंनिधिं॥इतिपठेत्॥
आपोहिष्ठामयोभुवइतितृचं॥एतोन्विंद्रंस्तवामशुंशुंशुनसाम्ना॥शु
धेरुत्सेवोद्वांसंशुधआशीर्वान्ममत्तु॥इंद्रःशुधीनआगहिशुधःशु
धाभिरूतिभिः॥शुधोरयिंनिधारयशुधोमहिसोम्यः॥इंद्रःशुधो
हिनोरयिंशुधोरत्नानिदाशुषे॥अश्वित्रागिज्रिभसेशुरोनाजंसिषासासि॥
ऋतंचसत्यंचस्वस्तिनइत्याद्यांश्चपठेत्॥ततोपूर्वतशुध्यादिऋष्यादिगायत्री
न्यासंकुर्यात्॥तद्यथा॥ब्रह्मणेऋषयेनमःशिरसि॥गायत्रीछंदसेनमः
मुखे॥सवितृदेवतायैनमःहृदये॥पुनःजमदग्निभरद्वाजगौतमक

शोर॰ नि॰ ५ ऋषयविश्वामित्रवसिष्ठेभ्यो ऋषिभ्यो नमः शिरसि। गायत्र्युष्णिगनुष्टुप् बृहती पंक्ती त्रिष्टुप्जगतीछंदोभ्यो नमः मुखे। अग्निवायुसूर्यगुरुवरुण वृषविश्वेभ्यो देवेभ्यो देवताभ्यो नमः हृदये॥ पुनः ब्रह्मणे ऋषयेनमः शिरसि॥ देवीगायत्रीछंदसे नमः मुखे॥ परमात्मादेवतायेनमः हृदये॥ इतिविन्यस्य॥ अथप्राणायामः॥ ॐभूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुरितिगायत्र्यं तेजोमापोज्योतीरसोमृतंब्रह्मभूर्भुवः स्वरों॥ इतिप्राणायामंकृत्वा॥ विश्वामित्रऋषयेनमः शिरसि॥ गायत्रीछंदसेनमः मुखे॥ सवितृदेवता येनमः हृदये॥ इतिविन्यस्य॥ ॐ ब्रह्मणेहृदयायनमः॥ ॐ विष्ववेशिरसे स्वाहा॥ ॐरुद्रायशिखायैवषट्॥ ॐईश्वरायकवचायहुं॥ ॐसदाशिवायनेत्र यायवौषट्॥ ॐसर्वात्मनेअस्त्रायफट्॥ इतिषडंगंविधाय॥ ॥

५

ॐ भूः हृदयायनमः॥ ओंभुवः मुखाय॰ ओंस्वः दक्षिणांसाय॰ ओंमहः वामांसाय॰ ओं जनः दक्षिणोरवेनमः। ओंतपः वामोरवेनमः। ओंसत्यंजठरायनमः। अथाक्षरन्या सः॥ ओंतंनमः पादांगुलिमूलेषु। ओंत्संनमः गुल्फयोः। ओंविंनमः जानुनोः॥ ओंतुंनमः ऊरुमूलयोः। ओंवंनमः कट्योः। ओंरेंनमः नाभौ। ओंणिंनमः हृदि। ओं यंनमः कंठे। ओंभंनमः करांगुलिमूलेषु। ओंर्गोनमः मणिबंधयोः। ओंदेंनमः कू पंरयोः। ओंवंनमः भुजमूलयोः। ओंस्यंनमः मुखे। ओंधींनमः नासिकयो। ओं मंनमः कपोलयोः। ओंहिंनमः नेत्रयोः। धिंनमः कर्णयोः। ओंयोंनमः भ्रुवोः। ओं योंनमः शिरसि। ओंनंनमःमूर्ध्नि। पश्चिमवक्त्रायनमः। ओंमंनमः उत्तरवक्त्रा यनमः। ओंचोंनमः दक्षिणववक्त्रायनमः। ओंदंनमः पूर्ववक्त्रायनमः। ओंयात् नमः ऊर्ध्ववक्त्रायनमः। अंदन्यासः॥ ओंतत्शिरसि। ओंसवितुः भ्रूमध्ये। ओंवरे

MEMORIAL

पंचनेत्रयोः ॐ भर्गः मुरवे। ओं देवस्य कंठे। ओं धीमहि हृदि। ओं धियः नाभौ। ओं यः
गुह्ये। ओं नः जानुनोः। ओं प्रचोदयात् पादयोः। पुनः ओं नमः शिरसि। ओं भोः ज्योती
रसोमृतं ब्रह्म भूर्भुवः स्वरों। सर्वांगे व्यापकं न्यसेत्। ततोस्त्रादिन्यासः। ओं ब्रह्मणे
हृदयायनमः। ओं विष्णवे शिरसेस्वाहा। ओं रुद्रायशिखायैवषट्। ओं ईश्वरायक
वचायहुं। ओं सदाशिवायनेत्रत्रयायवौषट्। ओं सर्वात्मनेअस्त्रायफट्। ततः षडंगं
न्यासं कुर्यात्। ओं तत्सवितुर्ब्रह्मात्मनेअंगुष्ठाभ्यांनमः। ओं वरेण्यंविष्ण्वात्मनेतर्ज
नीभ्यांनमः। ओं भर्गोदेवस्यरुद्रात्मनेमध्यमाभ्यांनमः। ओं धीमहिमामात्मनेअना
मिकाभ्यांनमः। धियोयोनः कालात्मनेकनिष्ठिकाभ्यांनमः। ओं प्रचोदयात्सत्या
त्मनेकरतलकरपृष्ठाभ्यांनमः। एवंहृदयादि। ध्यानं। मुक्ताविद्रुमहेमनीलधवल
छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटांतत्सार्यवर्णात्मिकां। गायत्रीवर

रत्न

दाममांकुशाकशांशूलंकपालंगुणंशंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतीभजे। स्फटिकसंपु
टंचैवविद्रुमंतद्विस्तृतंतथा। द्विमुखंत्रिमुखंचैवचतुःपंचमुखंतथा। षण्मुखंचाष्टमुखंचैव
व्यापकांजलिकस्तथा। शंकटंयमपाशंचयधितंचो त्पलंकुकं। फलंचमुष्टिकंचैव
मत्स्यः कूर्मोवराहकं। सिंहाक्रांतंमरुत्क्रांतंमुरुंरपल्लवंतथा॥ एतामुद्रान्प्रदर्शयानि
गायत्रीनिष्फलास्सवेत्। एतान्यांहस्तमात्रांचेदिंकृत्वा। तदुपरिसर्वतोस्त्रंविलि
ख्यतत्रब्रह्मादीनावाहयेत्। ततः वेद्यांमध्येमरीचेरित्यादिकलशस्थापनप
र्णपात्रनिधानांतंकृत्वा। तन्मध्येपद्मंदीप्तंपत्रेवायंत्रंविलिख्यमध्येमध्येव
त्तं। तद्बहिस्त्रिकोणं। तद्बहिर्वृत्तंसाष्टदलं। तद्बहिश्चतुरस्रं। एवंयंत्रंसंपाद्य।
सौरपीठमध्येदीप्तादीनावाहयेत्। दीप्तायैनमः। सूक्ष्मायैनमः। जयायै० भद्रा
यै० विमलायै० अमोघायै० विद्युतेन० सर्वतोमुखयै० तत्रगंधादिभिरर्चयेत्॥

विभूत्यै०

रां॰ति॰ ततः कलशस्थापनं। रांरवंघंटांसंपूज्य। पूजासामग्रीं आत्मानंचत्रिःप्रोक्षयेत्। दक्षि
णेघृतदीपं। वामेतैलदीपंस्थापयेत्। अथदेव्याआवाहनं। गायत्र्यायंत्रमध्येगायत्री
मंत्रंलिखित्वास्फुवर्णप्रतिमांवापरिकल्प्य। अग्न्फुत्तारणंपंचामृतस्नानंप्राणप्र
तिष्ठांचकुर्यात्। मूलमंत्रेणावाहनमुद्रायंत्रकल्पितमूर्तौनिवेश्यसावरणां
ध्यात्वाआवाहनादिमुद्राःप्रदर्शयेत्। आवाहनी। स्थापनी। संनिधापनी।
संरोधनी। संमुखीकरणी। अवगुंठिनी। सकलीकरणी। अमृतीकरणी। पर
मीकरणी। पार्थनी। मुक्ताविद्रुमहेमादिध्यानंकृत्वा। गायत्रीमंत्रेणपुरुष
सूक्तेनचदेव्याःषोडशोपचारैःपूजांकृत्वापुष्पांजलिंदत्वाश्रीदेवीमसंनाविभा
व्यतदाज्ञयाआवरणदेवतापूजांकुर्यात्। ओंह्रींगायत्र्यैनमः। पूर्वे। ओंह्रींसावि ७

त्र्यैनमःनैर्ऋत्यकोणे। ओंह्रींसरस्वत्यैनमः वायुकोणे। कोणांतराले वह्निरूपेरा
दित्यै। ओंब्रह्मणेनमः। ओंविष्णवे॰ ओंरुद्रायनमइतिसंपूज्यपुष्पांजलिंगृहीत्वा
मूलमंत्रमुच्चार्य। अभीष्टसिद्धिंमेदेहिशरणागतवत्सले। भक्त्यासमर्पयाम्ये
तत्प्रथमावरणार्चनमितिपुष्पांजलिंदत्वेतिप्रथमावरणं॥ अथद्वितीयावर
णं॥ कर्णिकायाःमध्ये। ओंआदित्यायनमः॥ परिधौचतुर्दिक्षु। ओंरवि
ये॰ ओंभानवे॰ ओंसूर्यायः ओंभास्कराय॰ विदिक्षुपत्रेषु। ओंउषायै॰
ओंप्रभायै॰ ओंप्रभायै॰ ओंसंध्यायै॰ नमइतिगंधादिनासंपूज्य। अभी
ष्टसिद्धिंमेदेहीत्यादितीयावरणार्चनमितिपुष्पांजलिंदत्वेतिद्वितीया
वरणं। २। अथतृतीयावरणं। यन्नाद्रुद्रिःकेसरेषुअष्टपत्रेषुऋक्मात्रं
चावरणानि। अग्निरानिर्ऋतिर्वायुवरुणेंद्रदिक्षुपत्रेषु। ओंब्रह्मणेरुद्र

रा०नि

यायनमः।ॐविष्णवेशिरसेस्वाहा।नमः।।ॐरुद्रायशिखायैवषट्नमः।।ॐईश्व
रायकवचायहुंनमः।ॐसदाशिवायनेत्रत्रयायवौषट्नमः।सर्वात्मनेअस्त्रायफ
ट्नमः।इतिगंधादिनासंपूज्याभीष्टेत्यादितृतीयावरणार्चनमिति ३ अथच
तुर्थावरणं।। तदुपरिपूर्वदलमारभ्येशानीपर्यंतंक्रमाद्दलेषु।ॐमल्हादिन्यैनमः।
ॐप्रभायै०ॐनित्यायै०ॐविश्वंभरायै०ॐविलासिन्यै०ॐप्रभावत्यैॐजयायै०ॐ
रांतायैनमइतिसंपूज्याभीष्टेतिचतुर्थावरणार्चनमिति। ४। अथपंचमावरणं।
तदुपरिपूर्वदलमारभ्य।ॐकांतायै०ॐदुर्गायै०ॐसरस्वत्यै०ॐविद्यारूप
ायै०ॐविशालायै०ॐईशायै०ॐव्यापिन्यै०ॐविमलायैनमइतिसंपूज्या
भीष्टेतिपंचमावरणं।।५।अथषष्ठावरणं।तदुपरिपूर्वदलमारभ्य।ॐतमोप
हारिण्यै०ॐसूक्ष्मायै०ॐविश्वमोनयै०ॐजयावहायै०ॐपद्मालयायै०ॐ
परायै०ॐशोभायै०ॐपद्मरूपायैनमइतिसंपूज्याभीष्टेतिषष्ठावरणार्चन

मिति।।६।।अथसप्तमावरणं।।तदुपरिपूर्वदलमारभ्य।।ओंब्राह्म्यै०ॐमाहेश्वर्यै०
ॐकौमार्यै०ॐवैष्णव्यै०ओंवाराह्यै०ॐइंद्राण्यै०ॐचामुंडा०ओंअपराजितायैनमइति
संपूज्याभिष्टेति।।सप्तमावरणार्चनमिति।।७ अथाष्टमावरणं।।पूर्वादिदिक्षु
पत्राग्रेषु।।ओंसोमाय०ॐभौमा०ओंबुधाय०ओंबृहस्पतये०ओंशुक्राय०
ओंशनैश्चराय०ओंराहवे०ओंकेतुनमइतिसंपूज्याभिष्टेतिअष्टमाव
रणार्चनमिति।।८।।अथनवमावरणं।।तदुपरिचतुरस्रेपूर्वादिदिक्षा
धोर्ध्वंच।।ओंइंद्राय०ओंअग्नये०ओंयमाय०ओंनिर्ऋतये०ॐ
वंवरुणाय०ओंवायवेन०ओंसंसोमाय०ॐहंईश्वराय०ओंब्रह्मणे०ओं
नंताय०ओंॐब्रह्मणेनमइतिसंपूज्याभीष्टेतिनवमावरणार्चनं

मिति॥९॥अथदशमावरणं॥तदुपरिचतुरस्रेपूर्वादिदिक्ष्वधोर्ध्वेच॥ओंवंवज्रा॰
अंरंशक्तयेओंदंदंडायओंखंखड्गायओंपंपाशायओंअंअंकुशायओं गं
गदायैओंत्रिंत्रिंशूलायओंचंचक्रायओंअंअंबुजायनमइतिसंपूज्याभी
ष्टेतिदशमावरणार्चनमिति॥१०॥सर्वासामावरणदेवतानांपुनरुपचारैरभ्यं
र्चप्रसन्नांदेवींविभाव्यस्वात्मानंदेव्यात्मरूपंध्यात्वासंपूज्यदेवींगुरुमंत्रात्म
नाऽभेदेनविद्यावपुषेक्यंविद्यावयेदितिपूजाविधिः॥ ॥अथजपः॥पुण्यतिथौ॥
यजमानस्यपुरश्चरणजपसंख्यापरिपूरणार्थंचतुर्विंशतिलक्षंत्रिसहस्रं
वागायत्रीजपंकरिष्ये॥इतिसंकल्प्यऋष्यादिन्यासंकृत्वाध्यात्वामनसापंचोप
चारैःसंपूज्याहरहरुःसमाप्तिपर्यंतंसमानंजपंकुर्युः॥मूलमंत्रमुच्चार्य॥ॐ
लंपृथिव्यात्मकंगंधंपरिकल्पयामि॥मू॰ॐहंआकाशात्मकंगायत्र्यै

गायत्र्यै
पुष्पंप॰मू॰ॐयंवायवात्मकंधूपंप॰मू॰ॐरंअग्न्यात्मकंगायत्र्यैदीपंप॰मू॰ॐवं
अमृतात्मकंगायत्र्यैनैवेद्यंप॰॥मालेमायेमहामायेसर्वशक्तिस्वरूपिणि॥चतुर्व
र्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदास्तव॥इतिसंमार्ज्य॥ॐअविघ्नंकुरुमालेत्वं
मादायसवितारंध्यायन्॥हृदयसमीपेमालांधारयन्एकाग्रचित्तोमध्यंगु
लिमध्यपर्वणिनिधायउन्मनगात्रःप्रत्याक्षरेणसप्रणवव्याहृतिपूर्वकंगायत्री
मंत्रमुच्चारयन्मध्यंदिनावधिजपेत्॥गायत्र्याविश्वामित्रःसवितागायत्रीज
पेविनियोगः॥पुनः॥त्वंमालेसर्वदेवानांप्रीतिदासुसदाभव॥शिवंकुरुष
येभद्रेयशोवीर्यंचसर्वदा॥गुह्याद्गुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं॥
अभीष्टसिद्धिंमेदेहित्वत्प्रसादान्महेश्वरि॥इतिशिरसिमालांनिधायजपंसमर्प्य
पुनःषडंगंकुर्यादिति॥मुद्रांकुर्यात्॥स्मरेत्सच्चिदानंदरूपंचमोनिः कूर्मोथपंक

जं॥ लिंगंनिर्याणमुद्रांचजपांतेशौमदक्षिणेत॥इतिजापविधिः। एवंसमाप्तेजपेतिथ्या
दिसंकीर्त्यकृतस्यचतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणजपारव्यस्यकर्मणः सांग
तासिध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंचतुर्विंशतिसहस्रहोमाख्यंकर्मकरिष्ये॥तदंगगणप
तिपूजनंकरिष्ये।कुंडमंडपंचकृत्वा।वास्तुपीठंचकृत्वा।यथोक्तविधिनाग्निंप्र
तिष्ठाप्य।अग्न्याधारादिकलशस्थापनांतंकृत्वाग्न्याधानंकरिष्ये।अद्यएत्या
दिसामान्यप्रधानांतमुक्त्वाग्न्याधानंकरिष्ये।आदित्यादिग्रहान्प्रत्येकंप्रतिद्रव्यंअ
र्कादियथालाभसमिच्चर्वाज्याहुतिभिर्विंशतिसंख्याहुतिभिः पार्श्वदेवतांप्रधा
नदक्षांशेनगणपत्यादिलोकपालांश्चप्रधानदक्षांशेन॥मुख्यंप्रधानंसविता
रंप्रतिद्रव्यंसहस्रत्रयसंख्याकाभिः पायसतिलदूर्वाअश्वत्थोडुंबरवटप्लक्ष
अर्कसमिद्भिरष्टोत्तरशतसंख्याभिः।आवरणदेवताश्चएकैकयाघृताक्ततिलाहुतिभिर्यस्ये।
वरुणंद्विरित्यादि।प्रधानहोमंकुर्यात्।स्विष्टकृदादिबलिदानंपूर्णाहुत्यंतंकृत्वाशे

षंसमाप्याचार्यादिभ्योऋत्विग्भ्योदक्षिणांदद्यादितिहोमविधिः। एवंहोमंसमाप्य।तदक्षां
शेनगायत्र्यंतेसवितारंतर्पयामीतितर्पणंकार्यं।तर्पणदक्षांशेनगायत्र्यंतेआत्मानम
भिषिंचामीतिस्वमूर्ध्निमार्जनंकार्यं।अभिषेकदक्षांशेनब्राह्मणभोजनंकृत्वादक्षिणां
दत्वाशिषोगृहीत्वा।मयाकृतस्यचतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणंसंपूर्णम
स्त्वितिभवंतोब्रुवंतु॥तेसंपूर्णमास्त्वितिब्रूयुः॥ इतिशारदातिलकोक्तभट्ट
रंकरात्मजभट्टसांबकृतगायत्रीपुरश्चरणप्र[redacted]समाप्तः॥ ॥अथमालासं
स्कारः।कुशोदकसहितैः पंचगव्यैः मालांप्रक्षा[redacted]ह्रीं अंआंइंईइत्यादिक्षांत
संतानिमांत्रकाघक्षराणिअश्वत्थपत्रस्थापितेमालायांविन्यस्य।ॐसद्योजातं॰
वामदेवायनमो॰अघोरेभ्यो॰तत्पुरुषाय॰ईशानःसर्वविद्॰पंचब्रह्ममंत्रान्जपित्वाएतेषां
मध्येप्रथमेपंचगव्येनप्रोक्ष्यक्षीरजलेनमालांप्रक्षाल्य।द्वितीयमंत्रेणचंदनेनाभ्यर्च्य।
तृतीयेनमालांधूपयित्वा।चतुर्थमंत्रेणचंदनकस्तूर्यादिलेपयित्वा।पंचमंत्रेणप्रति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मणिंस्नातमभिमंत्रयेत्।अघोरेभ्यइतिमंत्रेणमेरुंस्नानवारमभिमंत्रयेत्॥ततःए
तैरेवपंचभिर्मंत्रैः पंचोपचारैर्मालांइष्टदेवतांसंपूजयेत्॥इतिमालासंस्कारः
॥ ॥इतिपुरश्चरणविधिःसमाप्तः॥ ॥विष्णुनालिखितंस्वार्थंपरोपका०
जोगळेकरोपनामकहरिभक्तात्मजपरशुरामेणलिखापितं॥ ॥८९॥